गुरुत्वादौ धर्मिग्राहकमानादिति प्राञ्चः ।

अपरे तु रूपरसादौ गुणाकाराध्यक्षं नाप
रणं येन तत्सिद्धिः स्यात् । नापि द्रव्यकर्मान्य
सामान्यवति यः कारणतास्तदवच्छेदकतया तत्सि
एवंविधप्रकारेण जातिसिद्धेरभावात् । अन्य
न्यस्मिन् सामान्यवति यः कारणतास्तदवच्छे
जातिसिद्धौ तथा सङ्करापत्तेः । अत एव सामान्य
न्यस्मिन् वर्तते यः संयोगसमवायिकारणत्वाव
च्छेदकतयाऽपि न गुणत्वसिद्धिः । रूपान्यसा
संयोगसमवायिकारणत्वाभावात् तदवच्छेदकत
सिद्धौ तथा सङ्करप्रसङ्गात् । तस्माद् द्रव्यकर्मान्
सामान्यवत्त्वं गुणत्वं, रूपाद्यन्यतमत्वं तु न गु
णात् । गुरुत्वादेर्निरस्यत्वेन तद्घटितान्यतमत्व
बत्वाच्चेति प्रागेवास्तोभायमित्याहुः ।

ते द्विविधाः । सामान्यगुणा विशेषगुणा
विशेषगुणाः रूपरसगन्धस्पर्शसांसिद्धिकद्रवत्व
सुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मबुद्धिभावनाख्याः ।
सामान्यगुणाः । विशेषगुणत्वं तु एकद्रव्यनिष्ठ
स्वच्छिन्नवृत्तिमत्त्वम् [illegible]

।

रूपत्वजातिमद्रूपम् । रूपत्वजातिस्तु नील
अनुगताद्यध्यक्षेण सिद्धा । न चातीन्द्रियनीला
सिद्धिः स्यादिति वाच्यम् । समवायेन विजाती
प्रति स्वाश्रयसमवेतत्वसम्बन्धेन नीलादे
त्वादेःपरमाणुनीलादिवृत्तित्वेन साङ्कर्यवारण
परमाणुरूपादिवृत्तित्वस्वीकारात् । न च र
रूपत्वाद्यवच्छिन्नं प्रति कारणत्वात् प्रत्य
त्वादेरेव कारणतावच्छेदकतया परमाणुरूपा
सिद्धिरिति वाच्यम् । रूपत्वादेर्नित्यवृत्तित
वच्छेदकत्वात् । नापि जन्यरूपत्वादिकं रू
वच्छेदकं पाकादपि रूपादेर्जायमानत्वेन व्या
पि विजातीयरूपत्वादिकं नीलत्वादेः पाकज
त्वेन रूपादिजन्यतावच्छेदकवैजात्यस्य पी
नोभयो रूपादिजन्यनीलादिवृत्तित्वेन नीलाद
ङ्करप्रसङ्गात् । नापि पाकजन्यजन्यरूपत्वा
जन्यताऽपि रूपादौ रूपाद्यजन्यजन्यरूपत्व
ति प्रागुक्तेत्यन्योन्याश्रयप्रसङ्गात् । न च वि
दिकं प्रति पाकजन्यता तथा च पाकजन्य
कं प्रति रूपादिजन्यत्वमिति वाच्यम् । वि
दिकं प्रत्येव नीलादेर्हेतुत्वं रूपाद्यजन्यजन्य
ति पाकस्य हेतुत्वमित्यस्यापि सुवचत्वात् ।

नुत्पत्तस्तदभावे चोत्पत्तेरन्वयतो व्यतिरेका
चारास्तथापि स्वेदस्य प्रयोजकत्वमाश्रित्योक्तं
मानुषादिशरीराणां क्लेदोष्मादिनाशेऽपि ग
पार्थिवत्वसिद्धिः ।

वृक्षादौ शरीरत्वे पुराणाद्येव मानम् ।
तसंरोहणेनाध्यात्मिकवायुसंबन्धानुमानात्तेषां
सिद्धिमाहुः । तन्न । कस्तूरिकादौ यथा सजातीय
न्धकल्पनाभ्रमच्छिद्रता । तद्यथा । कस्तूरिकागन
कस्तूरिकासंबन्धो ऽवश्यं वाच्यः । अन्यथा सा
येन गन्धग्रहणानुपपत्तेस्तेषां कस्तूरिकावयवसंब
निर्गमनं विना न सम्भवतीति कस्तूरिकादेः स
सत्तो तत्र सजातीयावयवसम्बन्धकल्पनान्न
था सजातीयावयवसंबन्धकल्पनेन भग्नक्षतसं
नाध्यात्मिकवायुसंबन्धे मानमिति । न वा
रीरत्वसिद्धिः । तत्संबन्धस्याकाशादिसाधा
थपि चक्षुरादेर्गमनेन घटादिग्रहणवद्घ्राणगमने
हसम्भवाच्चेयं कल्पना तथाप्यनुकूलवातादि
त्या तथाकल्पनमिति प्राञ्चः ।

शरीरत्वं त्ववच्छेदकतासंबन्धेन सुखादेस्त
बन्धेन जनकत्वम् । न च हस्तादौ शरीरत्वापत्ति
त् । अन्त्यावयवित्वेन विशेषणाच्चेति केचिदा
वच्छेदकतासंबन्धेन सुखाद्युत्पत्तौ न तादात्म्य
रत्वेन कारणता । ...

दिसंयोगे कल्पनाच्च शरीरत्वदवयवादावच्छे
न सुखाद्यनुत्पत्तिः ।

ापि सा जातिः स्वाश्रयसमवायिसमवेतत्वस
रादाविव हस्तादिगतगुणादिष्वप्यस्तीति न
कतासम्बन्धेन सुखाद्युत्पत्तिः, शरीरव्यवहार
ात्तथापि द्रव्यत्वविशेषिताया स्तस्याः सुखज
कत्वाच्छरीरव्यवहारादौ च प्रयोजकत्वाच्च दो
चित्तु स्वाश्रयजन्यत्वसम्बन्धेन तस्याः शरीर
ाजकत्वात्, सुखकारणतावच्छेदकत्वाच्च नाि
ाहुः ।

न्ये तु चेष्टावदन्त्यावयवित्तिद्रव्यत्वव्या
(। तादृशजातिश्च चैत्रत्वादिः । नृसिंहशरी
न नरसिंहवृत्तिनृसिंहत्वेस्य सत्वाच्चोक्त
तम् । पृथिवीत्वादिना सङ्कराद्धस्तत्वजात्य
यविपद्वैयर्थ्यात् । न च हस्तत्वं पृथिवीत्व
नानैवेति वाच्यम् । शरीरत्वस्यापि पृथिवीत्व
ानात्वस्वीकारादेव नृसिंहशरीरे लक्षणसं
त्रजात्युपपादनायासवैयर्थ्यात् ।

न्द्रियरूपा पृथिवी गन्धग्राहकमिन्द्रियम् तत्र
गन्धग्राहकेन्द्रियस्य पृथिवीत्वं त्वनुद्भूतगन
ापि साधितं प्राक् । के चित्तु घ्राणं पार्थिवं रू
र्शशब्देषु मध्ये गन्धस्यैवाभिव्यञ्जकत्वात् ।

हेतुत्वे मानाभाव इत्याहुः ।

केचित्तु चक्षुर्मात्रग्राह्यविशेषगुणो रूपम् । मेऽस्तिसंयोगरूपत्वादिवारणाय मात्रविशेषगुण न चातीन्द्रियरूपेऽव्याप्तिः । तादृशगुणवृत्ति व्यजातिमत्त्वस्य विवक्षितत्वादिति प्राहुः । र्मात्रगृहीतस्नेहविशेषवृत्तिस्नेहत्वस्य स्नेहे सत् तेऽव्याप्तिः । न च चक्षुर्मात्रग्राह्येति जातेर्वि ष्टदोष इति वाच्यम् । विशेषपदगुणत्वव्याप्य ात् । प्रभात्वस्य गुणावृत्तित्वेनैव वारणादिति

तच्च रूपं पृथिव्यादित्रयवृत्ति । नीलपीतरक्त श्वेतचित्रभेदात् सप्तविधम् । उद्भूतमनुद्भूतं च सप्तविधमप्यनित्यमेव । जलतेजोवृत्ति शुक्लमेव पगतं नित्यम् । अनित्यगतमनित्यम् । नीला त्वादिजातियोगि, नीलत्वादिजातौ प्रत्यक्षमेव

ननु समवायेन नानारूपज्ञानाद्विजातीयना ाद् समानाधिकरणसमानकालीनविजातीयन ाद्[1] चित्रव्यवहारोपपत्तौ न चित्ररूपे मानम घटे कश्चित्किंविजातीयरूपप्रहवतोऽसमवायिव पभेद इति भ्रान्यतश्च घटे नानारूपाणां स ऽपि न चित्रव्यवहार इति चेत् ।

१ नानारूपेत्युक्तौ कालिकसंबन्धेन नानारूपवान् घट इति ज्ञाते चि ति समवायेनेति । तावत्युक्तौ ठश्यामकपालारब्धघटावयवसमवा मेव इति समाद्धश्यामरूपवानायं घट इति साम्प्रतचित्रव्यवहार योयेति । तावत्युक्ते समवायेन नीलो घटः पीतः पटो रक्तं कुड्यं मि

पत्त्या रूपमावश्यकम् । तत्र नीलपीतादिन
ारे गौरवम् । न च नीलपीतादेः कारणत्
श्यकत्वेन तत एव चित्रव्यवहारोपपत्तेरिति
कारे गौरवमिति वाच्यम् । समवायेन नी
ति स्वाश्रयसमवेतत्वसम्बन्धेन नीलेतररू
कत्वमावश्यकं वाच्यम् । अन्यथा तादृशघट
लावच्छेदेन नीलोत्पादापत्तिः । तथा च नी
योः परस्परं प्रतिबन्धकयोः सत्त्वान्न नील
त्पत्तिः । अतश्चित्रमेव प्रत्यक्षान्यथानुपपत्त्या
याहुः ।

परे तु[1] समवायेन नीलादिकं प्रति न स्वाश्र
सम्बन्धेन नीलादेर्हेतुत्वं येनोक्तरूपेण प्रति
त् किन्त्ववच्छेदकत्वसम्बन्धेन नीलादिकं
न नीलादेः कारणत्वम् । तथा च तादृशघटादेर्नी
च्छेदकतासम्बन्धेन नीलकपालादावेवोत्पत्ति
लादावपि । न च समवायेन नीलादिकं प्रति
त्वसम्बन्धेनापि नीलादेर्हेतुत्वं वाच्यम् । अन
लादावच्छेदकतासम्बन्धेन जायमानं समव
दाविवाकाशादौ पीतघटादावपि उत्पद्येतेति
समवायेन घटादौ जायमानं प्रतीतिवशात् अ
च्छेदकतया स्वीक्रियते यथा भवद्भिः, तथाव
बन्धेन जायमानं प्रतीतिवशात् समवायेन घट
न इति । न हि सर्वेऽपि सम्बन्धाः कार्यताव

यसमवेतत्वसम्बन्धेन हेतुत्वं न त्ववच्छेदकत
ापि । न वा नीलेतररूपादेर्नीलादिकं प्रति स्व
तत्वसम्बन्धेन प्रतिबन्धकत्वम् । न चैवं ता
ीलपीतादेर्व्याप्यवृत्तित्वापत्तिः । केषांचित्
ाप्यवृत्तित्ववदेकदेशव्याप्यवृत्तित्वस्वीकारात्
वावच्छेदकतासम्बन्धेन नीलादिकं प्रति स
व्यस्य कारणत्वमन्यथा पटाभावदशायां नी
च्छेदकतया नीलोत्पत्त्यापत्तिः । न वाऽवच्छेद
येन रूपोत्पत्तिं प्रत्यवच्छेदकतया रूपस्य प्रति
नरं कल्पनीयम् । अन्यथाऽवच्छेदकतासम्बन्धेन
नरवच्छेदकतया नीलापत्तेः । पाकात् समवा
त्तेः पुनरुत्पादवारणार्थं समवायेन रूपं प्रति
पस्य प्रतिबन्धकत्वस्यावश्यकत्वात् । न च नील
च्छिन्नचक्षुःसंयुक्तसमवायस्य नीलग्राहकत्वम् ।
वयवावच्छिन्नचक्षुःसंयुक्तसमवायस्य पीता
च्यम् । तथा च षट्कार्यकारणभावापत्त्याऽ
स्वीकार एवोचित इति वाच्यम् । नीलावयव
व चक्षुःसंयुक्तसमवायसत्त्वेऽपि चित्ररूपप्रत्यक्ष
वत्र प्रत्यक्षेऽवयवविजातीयनानारूपप्रत्यक्षस्य
वयवविजातीयनानारूपस्य कारणत्वेऽतिगौ

१ ननु अवच्छेदकतया कार्यतास्वीकारे अत एवेत्यादिना वक्ष्यमा
रणभावद्वयस्वीकारे गौरवापत्तिरित्यपमेयास्वरसः पूर्वकल्पे अतः पक्ष

देन सन्निकर्षे नीलादेः प्रत्यक्षत्वापत्तिः। नील
यवच्छिन्नसंयुक्तसमवायस्य नीलादिग्राहकत्व
यवृत्तित्वाङ्गीकारेऽपि तादृशसन्निकर्षस्यैव ग्रा
। अन्यथा पीतकपालावच्छेदेन सन्निकर्षेऽपि
समवायसत्त्वेन नीलग्रहापत्तिरिति नातिरिक्तं
एवमेव त्विश्रस्पर्शेऽपि साधकं तन्निराकरण
मेति वदन्ति।

रे तु समवायघटितस्वाश्रयाश्रयत्वविशिष्टाद
म्बन्धेन नीलादिकं प्रति समवायसम्बन्धेन र्न
मित्याहुः[1]।

सत्वजातिमान् रसः। रसत्वजातौ प्रत्य
। न चातीन्द्रियरसे रसत्वजातौ मानाभावः
विलक्षणमधुरादिकं प्रति स्वाश्रयसमवेत
मधुरादिरसादेर्हेतुत्वेन मधुरत्वादिजातेरती
वादिमधुररसादिवृत्तित्वेन मधुरत्वादिना र
यातीन्द्रियरसेऽपि रसत्वस्वीकारात्।
रे तु रसनेन्द्रियजलौकिकसाक्षात्कारविषय
व्याप्या जातिस्तद्वान् रासनलौकिकविषयता

रेत्स्विति। निष्कृष्टमतमेतदिति प्रतिभाति। पूर्वत्रास्वरसस्तु स
ीकारे अव्याप्यवृत्तित्वस्वीकारपक्षे अव्याप्यवृत्तित्वबलात्थं स्थित्थं
पीताद्युत्पत्तिनियमलाभेऽपि नीलाद्यवच्छेदेनैव नीलादेरुत्पत्तिर्नियामक
दुर्वारत्वात्। व्याप्यवृत्तित्वपक्षे तु नीलकपालावच्छेदेनैव चक्षुःसंयोगेन
त भ्राम्यतः सर्वत्र नीलमस्तीति शब्दप्रयुञ्जतो वाक्यश्रवणादन्यपुरुषो

द्रव्यजन्यप्रत्यक्षे उपनीतरूपत्वादेर्भानेऽपि
सन्नलौकिकविषयत्वाभावान्न रूपत्वादिकमा
ाप्तिः । गुणत्वमादाय गुणादावतिव्याप्तिवारा
व्याप्येति । यद्यपि गुणत्वस्यापि गुणत्वव्याप्य
याऽपि गुणत्वसमानाधिकरणाभावप्रतियोगित
ाप्यत्वेन विवक्षितं न तु गुणत्वसमानाधिकरण
दावतिप्रसङ्गात् । न वा गुणत्वाभाववद्वृत्ति
गुत्वभिन्नत्वं गौरवात् । रसनेन्द्रियग्राह्यगुणत्वं
लक्षणम् । अतीन्द्रियरसेऽव्याप्तेरिति वदन्ति ।

स च पृथिवीजलवृत्तिः । मधुरतिक्तकटुकषा
भेदात् षड्विधः । उद्भूतोऽनुद्भूतश्च । पृथिव्यां
ाकजश्च । षड्विधोऽपि पृथिव्यामनित्य एव उ
ाकजश्च । स नित्यगतो नित्योऽनित्यगतोऽनि

ननु मधुरतिक्तावयवारब्धे चित्ररूपोपपा
त्ररसो दुर्वार इति चेत् ? न । मधुरं प्रति मधुरे
क्तं प्रति तिक्तेतररसस्य प्रतिबन्धकतया तत्र
योरभावः । चित्रस्तु तत्र नाङ्गीक्रियते तत्कल्प
गावध्वंसयोः कल्पने च चित्ररसं प्रत्यतिरिक्त
भावकल्पने च गौरवापत्तेः । रसनेन्द्रियेण उ
दृश्यद्रव्यस्य नीरसत्वे क्षतिविरहात् । मधुरा
ायवमधुररसादिनैव चित्रप्रत्ययस्य चावयवि
नारसेनैवोपपन्नत्वात् ।

ादौ मानाभाव इति चेत् । न । त्र्यणुकमधुर
नुपपत्त्या मधुररसादिकं प्रति मधुररसादेर्हे
ापि मधुररसादेर्धारयितुमशक्यत्वात् सामा
ते प्राच्चः ।

ान्ये तु परमाणुद्व्यणुकयोरङ्गीकारेऽपि महत्त्व
ाघत्वेनैव रसे प्रतिबन्धकतास्वीकारान्न चत्
ाधुराद्युत्पत्तिः सम्भवति । न चैवमतिरिक्तप्र
धन्धकतास्वीकारे गौरवमिति वाच्यम् । अ
ितत्प्रागभावध्वंसादिकल्पनापेक्षया एकस्य प्र
तेबन्धकभावस्यैव स्वीकारात् । कथमन्यथा
पत्वेनापि प्रतिबन्धकतासिद्धिः । परमाणुद्व्यणु
ारे तु पार्थिवत्रुटौ मधुररसादिकं पाक
णुके तु मधुररसादिकं नित्यम् । तथा च मधुरा
वलक्षणपाकस्यैव हेतुत्वं स च पार्थिवत्र
नान्यत्र । तथा च त्र्यणुकमधुरादिनैवान्यत्र म
पोपपत्तेर्नान्यत्र मधुररसादिसिद्धिः । यदि चा
ोन तत्प्रतीतेः प्रामाण्यान्माधुरादिकल्पनं तद
ारब्धेऽपि समानम् । नन्वेवं चित्ररसप्रत
ास्यापि सिद्धिः स्यात् । न स्यात् । समानाधि
तीयनानारसेनैवोपपन्नत्वात् । एतेन चित्र
ाताः ।

ान्धत्वजातिमान् गन्धः । गन्धत्वजातिस्तु

दकतयाऽपत्तेरसाङ्कः ।

कश्चित् तु घ्राणग्राह्यगुणत्वं घ्राणजप्रत्यक्षकार
लक्षणम् । गन्धत्ववारणाय गुणेति प्राहु
संयुक्तसमवायस्य रूपादावपिसत्त्वेन तेषां घ्र
वारणाय गुणत्वविशिष्टलौकिकविषयतया घ्राण
न्धस्य गन्धसमवेतत्वविशिष्टलौकिकसाक्षात्क
। घ्राणजप्रत्यक्षे गन्धसमवेतस्य तादात्म्येन हेत
रूपादेरयोग्यत्वेनैव न घ्राणजं तेषामिति वा
रयोग्यत्वेन भेदानां घ्राणजप्रत्यक्षे कारणत्वे
। यद्वा लौकिकविषयतया घ्राणजभावप्रत्यक्षे
गेकसमवायस्य प्रतियोगित्वानुयोगित्वान्यत
गन्धस्य हेतुत्वमिति घ्राणजभावप्रत्यक्षेगन्धस्
तु । तथाऽप्याद्ये परमाण्वादिगन्धाव्याप्तेः । त
त्वात् । द्वितीये घ्राणसंयुक्तसमवेते रूपे सत्
न्निकर्षेण सत्ताघ्राणजापत्तेः । घ्राणजलौकिक
गुणत्वव्याप्यजातिमत्परतया तद्वर्णने घ्राणा
द्भूतगन्धवत्समवेतसमवायस्य हेतुत्वे तु तदपि
दिक् ।

स द्विविधः । सुरभिरसुरभिश्च । भूतोऽनु
ाऽपाकजश्च सर्वोऽप्यनित्यः । पृथिवीमात्रवृ
सुरभित्वत्रयम् । एकं प्रत्यक्षसिद्धं तत्सर्वं
सुरभिकारणतावच्छेदकम् । अपरं सुरभिनिष्ठ
र्यतावच्छेदकम् । पाककार्यताव[illegible]

ऽनुद्भूश्च नित्यो। नित्यः पाकजो ऽपाकजश्च। क
श्च। शीतः पयसि। उष्णस्तेजसि। अनुष्णा
वाय्वोः। पृथिव्यामनित्य एव पाकजोऽपाकज
नित्यगतो नित्योऽनित्यगतो नित्योऽपाकज
शादयश्च शीतस्पर्शत्वादिजातिमन्तः। ताश्च
प्त्यसिद्धाः।

नु कठिनत्वकोमलत्वयोः संयोगगतत्वेन क
भ्यामवयवाभ्यामारब्धे कथं चित्रस्पर्शोत्पत्ति
। तयोः संयोगगतत्वे चाक्षुषत्वापत्तिभयेन
ाङ्गीकारेण कठिनकोमलाभ्यामारब्धे चित्रस्
एतस्य सर्वोऽपि विचारश्चित्ररूपवदवसेयः
न्वनुद्भूतस्पर्शादौ मानाभाव इति चेदत्र प्रा
परसगन्धस्पर्शादिमत् पृथिवीत्वात्, इत्याद्यनु
न्द्धिः। उद्भूतत्वे तेषां महत्त्वसमानाधिकर
वापत्त्यानुद्भूतत्वे एव पर्यवसानमित्याहुः।
शेषिकास्तु, अस्तु पृथिव्यां पाकजं रूपादिकं
ावेव पाकाद्रूपनाशोत्पादौ रूपाजन्यजन्यनील
समवेतनीलत्वस्यैव विलक्षणपाककार्यतावच्
समवेतरूपनाशत्वस्यैव पाकनाश्यतावच्छेदक
घटादिनिष्ठरूपादिनाशे घटनाशादेर्हेतुत्वात्, प
रूपनाशासम्भवाच्च। कथं तर्हि घटादौ पूर्वरूपा
नरूपादिकं दृश्यते पूर्वरूपाश्रये दृश्यते एव न,

ाणुकोत्पादादिक्रमेण घटाद्युत्पत्तिः । द्व्यणुकं
दिक्रमेण घटान्तरे पूर्वघटसदृशो रूपोत्पत्तिः ।

अत्र प्रसङ्गाद्विचार्यते । द्व्यणुकनाशमारभ्य
तरे एकादशक्षणे रूपोत्पत्तिर्दशमे नवमेऽष्टमे वे
कादशक्षणा वेवम् । परमाणौ वह्निसंयोगात् क्रि
रमाणुद्वयविभागः, तस्मिन् क्षणे न परमाणव
गः, द्रव्यारम्भकसंयोगनाशकविभागजनकत्व
ानारम्भकसंयोगनाशकविभागजनकत्वनियम
सत्कमलकुड्मलादौ तथादर्शनात् । कथं तर्हि प
शविभाग इति चेत् । परमाणुद्वयविभागात् का
भागस्य कारणाकारणविभागहेतुत्वात् । पर
भागेन परमाण्वाकाशादिविभागे जननीये द्र
जनकसंयोगनाशो वाऽपेक्षितः । अन्यथा परमा
गस्य कर्मतापत्तिः संयोगविभागयोरनपेक्षं कार
लक्षणात् । तत्र द्रव्यनाशापेक्षत्वपक्षे घटपर
ा द्व्यणुकनाशस्तत्परमाणुक्रियान्तरेण द्व्यणु
ादशक्षणा । संयोगनाशापेक्षत्वपक्षे दशक्षणा ।
माणुक्रिया ततः परमाणुद्वयविभागस्ततः परम
ाशस्ततो द्व्यणुकनाशस्ततो द्वितीयक्षणे परमा
गेन द्रव्यनाशापेक्षेण परमाण्वाकाशविभागः
मनाशश्च ततस्तृतीयक्षणे परमाण्वाकाशस
रमाणुरक्तोत्पादौ । ततश्चतुर्थक्षणे परमाणूत्त
ास्ततः पञ्चमे क्षणे क्रियानिवृत्तिः क्रिया

... दृष्टान्त द्व्यणुकारपार
शक्षणे द्व्यणुके रक्तोत्पत्तिः ।
ननु परमाणावग्निसंयोगसत्त्वेन क्रियोत्पत्ति
क्षणयोरेव श्यामनाशरक्तोत्पादौ युक्तौ न तु
त्तरक्षणतदुत्तरक्षणयोः । न च सर्वावच्छेदेन
ारणत्वेन परमाणुसंयुक्ते परमाणौ सर्वावच्छे
ागाभावान्मूर्त्तयोः समानदेशताविरोधादिति
निबिडयोरेव समानदेशताविरोधात् । कथमन
संयुक्ते घटादौ चक्षुःसंयोगोत्पत्तिः । न वा र
ा पाकस्य हेतुत्वं किंतु विजातीयत्वेन । न
तादृशसंयोगत्वनियतं मानाभावादितिचेन्न न
ाविनश्यदवस्थावयविश्यामेऽवयवश्यामेन क
सत्त्वात् । द्व्यणुकनाशोत्तरमेव श्यामनाशात्
चरमवयवी श्यामोऽवयवाश्च न श्यामा इति
द्व्यणुकनाशोत्पत्तिक्षणे परमाणुरूपनाशापत्ति
समवायेन द्रव्यस्वरूपनाशोत्पत्तौ प्रतिबन
अन्यथा पाकसत्त्वेन परमाणौ क्रियोत्पादस
ात्पत्त्यापत्तेः । न च त्रिक्षणाप्रक्रियानुपपत्ति
ात्पत्त्यनङ्गीकारेण तदभिधानात् । यद्वा परमाणु
ागस्य विलक्षणसंयोगस्यैव वा प्रतिबन्धकत्वक
ारणमात्रविभागस्य संयोगनाशापेक्षस्य विभ
पत्ते द्व्यणुकद्वितीयक्षणे परमाण्वाकाशविभा
ाक्षणाङ्गासे दशाक्षणा कारणमात्रविभागस्य

नने द्रव्याद्यपेक्षणात् । उत्तरसंयोगजनने पूर्वसंयो
क्षणाच्च । न च स्वोत्तरभाविभागानपेक्षत्वं तस् ।
हकारिभावानपेक्षितत्वेन सहकारिकल्पनेऽपि
तव्यासिद्धेर्दुर्वारत्वात् । द्रव्यान्तरक्रियायाः स्वोर
स्य घटस्य घटसंयोगजननेऽपेक्षितत्वादव्याप्तेः ।

किंतु कर्मत्वजातिमत्कर्म । तथात्वेनमेव
योगेत्यादिनोक्तनियमानङ्गीकारे परमाणुद्व्य
त्तिसमये परमाण्वाकाशविभागजनने द्व्यणु
भावादुत्तरदेशसंयोगोत्पादादृष्टक्षणा क्रिय
विशिष्टकार्यकारणभावात् । अवच्छेदेन
तावच्छेदेन विभागाजनकत्वात् कमलनाश
दृशनियमाभावात् । यत्परमाणुक्रियया द्व्यणु
रमाणुक्रियान्तरेण द्व्यणुकोत्पादाभ्युपगमेत्विति
सम्भवत्येव । परमाण्वन्तरक्रियया द्व्यणुकोत्पादप
नक्षणेऽपि सम्भवत्येव । तथाहि । द्व्यणुकनाशा
क्षणे परमाण्वन्तरे द्व्यणुकारम्भानुगुणकर्मचिन्
णा द्व्यणुकनाशस्ततः परमाण्वन्तरे कर्म ततस्ते
। ततः पूर्वसंयोगनाशः ततः परमाणोरेतत्परम
ततो द्व्यणुकोत्पत्तिस्ततो रूपोत्पत्तिः । द्व्यणुक
ण्वन्तरे कर्मोत्पत्तिस्वीकारे षट्क्षणा तत्पूर्वक्षणे
त्पत्त्यक्षणा । तत्पूर्वक्षणे कर्मचिन्तनाच्चतुःक्षण
कर्मचिन्तनात्त्रिक्षणा द्व्यणुकनाशसमये परमा

। न्यूना न सम्भवत्येव । द्व्यणुकस्य प्रतिबन्धक
णुकान्तरानुत्पत्तेः । द्रव्यं प्रति द्रव्यस्य प्रतिब-
ाकुस्तत्र । घटाद्यवृत्तियौ घटादिसमवेतनाशस्त
ास्य विजातीयनीलादौ पाकस्य हेतुत्वेन घटाद्य
णुपर्यन्तेषु पाकादेव रूपादिनाशरूपाद्युत्पत्त्ये
ादीनामनन्तानां नाशाद्युत्पादकल्पने गौरवा

पाकेन परमाणौ रूपादि जायते इत्यत्र मान
चेत् । न । पाकेन रसालफलादौ पूर्वरूपादि
पादिकं दृश्यते । न च तत्परमाणौ पूर्वरूपा
ति कारणरूपादिना विलक्षणरूपादिकाले रस
पूर्वरूपादौ सजातीयरूपाद्यापत्तेः । अतः पाके
ण रूपादिनाशोत्पादौ युक्ताविति केचि
स्य रूपादिजन्यरूपादौ प्रतिबन्धकत्वकल्पनं
ःशरूपाद्यनुत्पादसम्भवेनानन्तपरमाणुरूपादि
त्पादकल्पने गौरवात् ।

तु हरिद्रादिभस्मनां हरिद्राद्यारम्भकपरमा
त् । हरिद्रादिनाशानुरोधेन तेषु क्रियाविभा
ोगनाशोत्तरदेशसंयोगानामावश्यकत्वमिति
णेष्वेव भस्मारम्भकवैजात्यं कल्प्यते लाघवात्
पवारब्धत्वं भस्मनः तेषु क्रियादिकल्पने गौर
च हरिद्रादिपरमाणौ भस्मोत्पत्तिकाले पीत

दीनां कल्पनैव युक्ता लाघवात् ।

वस्तुतो हरिद्रात्र्यणुकादिनाशे न मानम्
दिप्रभृतीनां भस्मन्यनुपलम्भादस्तु तेषां नाश
रिद्रादित्र्यणुकेष्वेव पूर्वरूपनाशरूपान्तरोत्प
थं परमाणुद्व्यणुकयोः पूर्वरूपसत्त्वे त्रसरेणौ
त्तिकाले द्व्यणुकपीतात्पीतापत्तिः पाकस्य विल
पीतादौ प्रतिबन्धकत्वस्योक्तत्वात् । यद्वा
तरूपनाशोऽस्तु त्र्यणुके पाकाद्रूपोत्पत्तिसमय
माणुरूपाद्रूपोत्पत्तिः रूपजनकपाकस्य द्व्यणुकेऽक
कजरूपोत्पत्तिः । उत्पादकनाशकयोर्भेदाङ्गीकार
माणौ रूपादिनाशे न मानमिति पृथिव्यां रूपा
मेवेति नव्यमत एव युक्तिसिद्धं न च प्राचांमते
गुणमाश्रयनाशनाश्यत्वं क्वचित्पाकनाश्यत्वम
गादिनाशत्वावच्छिन्ने नानुगतो हेतुः । द्रव्यत्वा
यनाशे समवायिकारणनाशोऽसमवायिकारणना
तोऽपि हेतुः । न चैवं द्व्यणुकनाशे क्लृप्तत्वाल्लाघव
गितया द्रव्यनाशे विलक्षणसंयोगनाशस्य स्वप्र
यत्वसम्बन्धेन स्वप्रतियोगिसमवायिसमवेतत
या हेतुत्वम् । न च कपालनाशजन्यघटनाशे क
पालनाशानन्तरं कपालसंयोगनाशाभ्युपगमा
म् । कपालसंयोगनाशोत्पादकाले घटेऽनन्तसं
ने गौरवोत्पादापत्तेः । अस्मन्मते समवायिकार
सहभावेन हेतुत्वात्तदा [illegible]

गादिकमपि। अत एव नीलतरं नीलतममिति
।पन्नः। नीलादेरुत्पादविनाशप्रत्ययस्तु तदुपल
समवायोत्पादविनाशौ वा विषयीकरोतीति
त्र घटादेरपि नित्यत्वापत्तेः। तदुत्पादविनाश
तदुपलम्भानुपलम्भविषयत्वेनैवोपपत्तेः। कि
विजातीयनीलत्वादिकमेवकार्यतावच्छेदकं
ायत्वम्, गौरवात्।
चित्तु घटो नील इत्यादिप्रतीत्या नीलादे
ः। तन्न। नीलपीताद्याश्रयस्यैव प्रतीतौ प्र
किञ्च तत्तत्समवेतकार्यं प्रति तस्य समव
ेनाभेदासम्भवात्।
चित्तु नीलादेर्घटाभिन्नत्वेन तेषां त्वाचत्वाप
न्न। इष्टापत्तेः। रूपत्वादेरेव तन्मते चक्षुमा
ति कश्चित्।
ख्यात्वजातिमती संख्या। संख्यात्वजाति
त्वादौ संख्यासंख्येत्यनुगतप्रत्ययसिद्धा। स
। असंयोगित्वात्। नापि कर्म। कर्मत्वेना
ाभावात्। नापि जात्यादिकम्। जातिमत्वा
पादिकम्। तद्विलक्षणत्वेनानुभूयमानत्वात
तिरिक्त एव गुणः। सा च द्विविधा। व्यास
ासज्यवृत्तिभेदात्। तत्राव्यासज्यवृत्तिरेकत्व
धगतं नित्यमनित्यगतमनित्यम्। तत्र स्वाश्र

रेकयोरभावान्नासमवायिकारणं तत्रैकत्वमि
कत्वत्वजातिमत् । सा चेदमेकत्वमिदमेकत्व
स्यत्वसिद्धा । गुणादावेकत्वप्रत्ययस्तु एका
अत एव गुणादावेकत्वमस्तु द्रव्ये तत्प्रत्यस
मवायित्वेनेति परास्तम् । एतद् घटादि
...त्कल्पनापेक्षया एतद् घटादावेव तत्कल्प
स्त्वात् । न चैकत्रैव तत्कल्पनम् । विनिगम
गुणान्तरेस्वाश्रयसमवायिसमवेतत्वसंबन्धे
थत्वे गौरवापत्तेश्च । न च कार्यद्रव्यगतमप्ये
रिति वाच्यम् । तस्यैकत्वे जातित्वापत्ते
च कार्यसमवेतगुणस्यानित्यत्वनियमादिति

व्यासज्यवृत्तिस्तु द्वित्वादिपरार्द्धान्ता
स्यैव । तत्र स्वसमानाधिकरणानि यावत्
वायिकारणम् । अपेक्षाबुद्ध्यादिनिमित्तकार
बुद्धिनाशान्नाशः परमाण्वादिद्वित्वादेरपेक्ष
रिनाशान्नाशः । अपेक्षाबुद्धेस्तत्तद्द्वित्वादौ का
द्वित्वादिसमानाधिकरणयावदेकत्वानामेकत्व
द्वित्वबुद्धित्वेन । अत एवायमेकोऽयमेक इ
इदमेकत्वमिदमेकत्वमित्याकारिकया वा स
पया द्वित्वोत्पत्तिः । एवं त्रित्वोत्पत्तिः द्वि
मये च नानन्तद्वित्वोत्पत्तिरपि, तस्या द्वित्वे
त्वादिति कश्चित् ।

...तु ...नाध्यवसाये तत्तद्द्वित्वादिसामानाधि
करण्यानामेकत्वत्वेन ज्ञानं हेतुः । त्रित्वोत्पत्ति
दशायामुत्पत्तिस्त्वित्थमेव । अयमेक इमौ द्वौ इ
त्रित्वानुत्पत्तिरित्थमेव । तत्समानाधिकरणत्वाद्
गाहित्वादित्याहुः ।
न्ये तु द्वित्वजनकतावच्छेदकमेकमपेक्षाबुद्धौ वैज
र्वं त्रित्वादिजनकतावच्छेदकमपि वैजात्यम्
। द्वित्वजनकतावच्छेदकवैजात्यव्याप्यं सर्व
ण्याप्यम्, अतो न चाक्षुषत्वेन त्रित्वजनकता
जात्यस्य द्वित्वजनकतावच्छेदकवैजात्यस्य वा
मेक इमौ द्वाविति ज्ञानात् त्रित्वानुत्पादस्ति
यथा द्वित्वत्रित्वोत्पत्तौ विजातीयज्ञानस्य हे
त्रयावगाहिनोऽप्येतादृशज्ञानात्त्रित्वोत्पत्तिव
। यथा । त्रित्वजनकतावच्छेदकं द्वित्वजनकता
जात्यं विरुद्धमेवेति वदन्ति । तन्न । भगवदपे
त्वाद्यनुत्पादापत्तेः । किञ्च घटेषु त्रित्वोत्प
त्वोत्पादस्य युगपन्नस्यात् । अयमेकोऽयमेक इ
त्रित्वजनकविजातीयज्ञानस्य विषये पटद्वये
प्रसङ्गाच्च । अत एव घटेषु त्रित्वस्य पटयो
गपदनुत्पादेऽपि न क्षतिः । तत्र पञ्चत्वसंख्या
ः ।
तु एकत्वप्रकारतानिरूपितविशेष्यतया विन
ं द्वित्वोत्पादकं एवं त्रित्वोत्पादकं तद्विजातीय

तिदिक् ।

नन्वीश्वरापेक्षाबुद्धेर्द्वित्वादिजनकत्वे किं म

अत्र केचित् । सर्गाद्यकालीनद्व्यणुकप
परमाणुद्वित्वोत्पत्तौ भगवदपेक्षाबुद्धिरेव का
रविरहेण तदा जन्यबुद्धेरभावात् । जन्या
द्धेराशुविनाशितया तज्जन्यद्वित्वस्यापि तदा
किं च त्र्यणुकमहत्त्वं प्रति अवयवगतत्रित्वस्
त्वात्तद्वित्वोत्पादिका भगवदपेक्षाबुद्धिरेव क
त्र्यणुकपरिमाणजनकद्व्यणुकसंख्यायाः जन्या
कत्वात् । अत एव परमाणुद्वित्वनाशव्यावृ
द्धिनाशकार्यतावच्छेदकं वाच्यमन्यथाऽव्यभि
तथा च परमाणुद्वित्वस्य अस्मदादिबुद्धिजन्य
न्तरेऽनुवृत्तिसम्भवात् । भगवदपेक्षाबुद्धेर्द्वि
न मानमिति परास्तम् ।

नन्वास्तु द्व्यणुकपरिमाणस्यासमवा
न्यत्वमेवास्तु भावकार्यस्यासमवायिकारण
नाभावात् । तादृशनियमाङ्गीकारेऽपि परम
मेवास्तु तत्रासमवायिकारणम् । न च परि
त्कृष्टपरिमाणजनकत्वनियमेन परमाणुपा
त्वेन तज्जन्यद्व्यणुकपरिमाणस्य ततोऽप्युत्कृष्ट
णुत्वप्रसङ्ग इति वाच्यम् । तादृशनियमे मान
पत्तेश्च । त्र्यणुकमहत्त्वं प्रचयजन्यमेवास्तु द्वि

यत्वेनानित्यत्वसाधनापत्तिरिति नेश्वरापेक्षा
द्जनकत्वे मानमित्याहुः ।

नु जन्यापेक्षाबुद्धेरपि द्वित्वादिजनकत्वे किं
न घापेक्षाबुद्धिशून्यस्यापि द्वित्वादिप्रत्यक्षाप
ाच्यम् । तस्या द्वित्वादिसाक्षात्कार एव का
न च द्वित्वादिसाक्षात्कारत्वापेक्षया द्वित्वत्व
क्षाबुद्धिकार्यतावच्छेदकं लाघवादिति वाच्य
द्वित्वादिकल्पनापेक्षया द्वित्वादिसाक्षात्का
ार्यतावच्छेकत्वादिति । नित्यमेव द्वित्वादि
येत् ? । न कार्यतावच्छेदकलाघवेन व्यक्तिग
स्वीकारात् । द्वित्वत्वादेरेवापेक्षाबुद्धिकार्यताव
त् । अन्यथा स्वर्गादिजन्यसुखत्वादिकमेव शरी
च्छेदकमस्तु । तथा च शरीरत्वेन सुखत्वेन च व
ावात्तत्र शरीरकल्पनापि न स्यात् । न च स्वर्गे
किककारणजन्यं सुखं तच्च शरीरसाध्यमे
। वनितासम्भोगजन्यसुखसजातीयसुखस्यै
जन्यत्वात् । न च स्रक्चन्दनवनितादिजन्य
यतावच्छेदिका जातयस्तज्जातीयसुखेष्वदृष्ट
दिकारत्वपरा जातयः कल्प्यास्तदपेक्षया श
लघीयसीति वाच्यम् । शरीरतदवयवावयव
नत्तद्ध्वंसादिकल्पने च गौरवप्रसङ्गादित्याहुः

ाधत। छित्वादेरनित्यत्वम् । छित्वत्वादेर्लौ
तया। छित्वत्वादिप्रत्यक्षनिष्ठस्यैव कार्यता।वच्छेद
चैवमपेक्षाबुद्धिशून्यस्य छित्वप्रत्यक्षापत्तिर्
ते वाच्यम् । छित्वत्वादिप्रत्यक्षातिरिक्तप्रत्य
। तदतिरिक्तस्यापादनासम्भवाद् छित्वत्वादि
त्तसामग्र्यभावादेवासम्भवात् । अन्यथा घटस
काले कम्बुग्रीवादिमत्तोऽप्यापादनस्य महत्त्व
दे। केवलप्रत्यक्षापादनस्य च दुर्वारतापत्ते
र्योर्द्वित्वप्रत्यक्षकाले पटादिविषयकापेक्षाबुद्धि
मकुधृपटयोर्द्वित्वप्रत्यक्षापत्तिः । कारणवशा
वच्छेदकावच्छिन्नमेवापादनीयं तस्य विषमा
न्यथा तथापि घटयोरिदानीं छित्वोत्पत्तिकाले
त्वोत्पादप्रसङ्गः । यद्वा छित्वादिकं सर्वत्रैकमे
। न चैवं छित्वादेर्जातित्वापत्तिः । समवेत
ति अनेकसमवेतत्वस्यैव जातित्वात् । यत्र
पेक्षाबुद्धिस्तत्र तत्प्रत्यक्षम् । अत एवापेक्षाबुद्धि
मकुधृपटयोर्द्वित्वे चक्षुःसंयुक्तसमवायसत्त्वेन
दनमपि निरस्तम् । अथवा तत्तदेकत्वविष
हेस्तत्तद्द्वित्वमेव विषयितया कार्यतावच्छेदक
द्वित्वाद्यविषयकद्वित्वत्वादिग्रहस्यालीकत्वादेव
बुद्धिशून्यस्य द्वित्वत्वप्रत्यक्षापादनं सम्
त्वादिकं नित्यमेवेति वदन्ति ।

।द्वित्वादेरेकत्वान्तरसमानाधिकरणतया त
या द्वित्वादेव तत्प्रत्यक्षासम्भवात्। अत एव पर
द्विजन्यद्वित्वादेः पुरुषान्तरं प्रत्ययोग्यत्वकर
ारस्ता। अत एव द्वित्वत्रित्वयोरेकदोत्पाद
त्वोत्पादप्रसङ्गवारणार्थं प्रागभावस्यासमवा
समवायिकारणस्य वा विशिष्य हेतुत्वकल्प
ना परास्ता। न च द्वौ त्रय इति प्रत्ययापत्ति
पे समाधेस्तुल्यत्वात्। अत एव एकत्वस्य स
यो रेकत्वमिति प्रत्ययापादनं परास्तम्। द्वयोर्
वात्। यथासंख्याताऽतिरिक्तस्थले द्वित्वान्वयि
नशक्तिस्तत्रापरपदार्थतावच्छेदकावच्छिन्नान्वय
द इत्याद्यप्रयोगः। क्षितिपयसोर्गन्धरसौ वि
पपन्न इति दिक्।

ागमसिद्धपरार्धसंख्यायाः अतीन्द्रियत्वेन त
ातौ मानाभावेन परार्धत्वजातिमत्त्वं न त
चेत्।

केचित्। परार्धं परार्धमित्यनुगतव्यवहारस्य
जातिसाधकत्वं प्राहुः।

ये तु एकत्वादिभिन्नसंख्यात्वं परार्धत्व
म।

तु स्वोत्पत्तिकालोत्पत्तिकयावत्संख्यासमान
संख्यात्वं निखिलविद्यमानद्रव्यगतत्वात् परा
। परार्धं प्रति परार्धस्य प्रतिबन्धकत्वात् पूर्वपर

क्षणे महाप्रलयः। तत्परार्धोत्पत्युत्तरक्षणे क्षा
भयेन जन्यभावोत्पत्त्यनङ्गीकारात् तत्परार्ध
त्पत्तिकथावत्संख्यासमानाधिकरणत्वेन त
अन्यपरार्धस्य स्वोत्पत्तिद्वितीयक्षणोत्पन्नसं
नाधिकरणत्वादव्याप्तेः प्रथममुत्पत्तिपदम्।
स्वोत्पत्तिक्षणे नष्टद्रव्यस्य संख्यया समान
दसम्भवपरिहारार्थं द्वितीयमुत्पत्तिपदम्। स्व
रसंख्याकान्यसंख्यात्वं तु न युक्तम्। पूर्व
न्तरोत्पत्तिको यः पूर्वपरार्धाश्रयद्रव्यनाशः,
मानद्रव्याण्यादाय परार्धान्तरोत्पत्तिः, तत
परार्धव्याप्यत्वात्तत्परार्धेऽव्याप्तेः। न च प्रति
रेव नाशोत्पत्तिस्वीकारान्नाव्याप्तिरिति वा
भावात्। परार्धस्य द्विक्षणस्थायित्वापत्तेश्च
द्रव्यनाशस्तदा तदा द्रव्योत्पादस्वीकारेणाप्ति
रणसम्भवे सति प्रतिक्षणं द्रव्यनाशद्रव्यो
म्भव इति दिक्।

यत्तु स्वव्यापकत्वविजातीयसंख्यान्य
क्षणम्। परार्धस्य परार्धव्यापकत्वेऽपि तस्य
मित्याह। तन्न। परार्धत्वजात्यभावेन तत्
तीयत्वात्। न च स्ववृत्तियावज्जात्यभाववत्
यत्वम्। परार्धस्य परार्धवृत्तयो यावत्यो जा
दयस्तद्भावात्तत्सजातीयत्वमेवेति वाच्यम्

[illegible]

ष्ठित्वादिव्यवहारस्तु तत्तात्स्वरूपमात्रविषय
यत्वेनैवोपपादनीयः । एवं सर्वत्रैव तत्तद्बुद्धि
यत्वेनैव द्व्यादिव्यवहारोपपत्तेर्नातिरिक्तसंख्य
त्याहुः ।

रिमाणत्वजातिमत्परिमाणम् । तच्च नित्य
नित्यगतमनित्यं संख्यापरिमाणप्रचयजन्यं च
त्वजातिस्तु परिमाणं परिमाणमित्यनुभवसिद्ध
म् । अणुमहद्दीर्घं ह्रस्वं च । अणुपरिमाणं नि
मनित्यगतमनित्यं चेति द्विविधम् । अनित्य
द्वित्वसंख्याजन्यं तच्च द्व्यणुक एव । नित्यं परमा
हत्त्वत्वजातिमन्महत्त्वम् । सा च प्रत्यक्षसिद्ध
मनित्यं चेति द्विविधम् । नित्यं त्वनणुद्रव्यत्वेन
दिगादिगतम् । अनित्यं तु त्र्यणुकाद्यन्यगा
। केषुचित् प्रत्यक्षसिद्धं केषुचित्कार्यत्वा
त्तोऽन्यथानुपपत्त्या सिद्धम् । कार्यमहत्त्वं तु त्रि
त्रजन्यं परिमाणमात्रजन्यं संख्यापरिमाणोभ
ख्यापरिमाणप्रचयत्रितयजन्यं परिमाणप्रचयोभ
ते पञ्चविधम् । केवलप्रचयजन्यं प्रचयसंख्यो
त्र महत्त्वं नास्त्येव । तथाहि । त्र्यणुकमहत्त्वं द्व
त्रजन्यं कपालादिद्वयारब्धघटादिमहत्त्वं स
परिमाणमात्रजन्यम् ।

किंतु अप्रचितारब्धत्र्यणुकमहत्त्वात्प्रचयार

धित्वादिति वदन्ति । तन्न । संख्याप्रचयम
त्वाश्रये संख्यामात्रप्रचयमात्रजन्यमहत्त्वे
यवमहत्त्वस्योभयत्र प्रतिबन्धकत्वम् । प्रचय
मात्रजन्यमहत्त्वविरोधित्वमिति प्रतिबध्यप्र
वत्रयं स्वीकार्यं तदपेक्षया त्रित्वसंख्याजन
जातिविशेषस्य प्रचयमात्रजन्यत्र्यणुकपरिम
जातिव्यापकत्वं स्वीकृत्य तस्याश्चावयवमहत्त्व
वच्छेदकत्वमस्तु । तथा चैकएव प्रतिबध्यप्रति

वस्तुतस्तु त्र्यणुकमहत्त्वे उत्कर्षापकर्षा
प्रचयमात्रजन्यत्वम् । अत एव संख्याप्रचय
न्यमपि निरस्तम् ।

परे तु त्र्यणुकमहत्त्वं प्रचयजन्यमेव । द्व्
द्व्यणुके नास्त्येव भूयोऽवयवावच्छेदेनानेकाव
वा ऽवयवान्तरासंयुक्ते ऽवयवे द्रव्यजनकसं
यत्वादिति वाच्यम् । विजातीयसंयोगस्यैव
न च द्व्यणुकसंयोगे वैजात्यकल्पने गौरवमिति
द्व्यणुकेषु त्रित्वसंख्यायास्तत्रेश्वरापेक्षाबुद्धेः
षाबुद्धिनाशस्य तत्त्रित्वादिनाशव्याप्तकार्य
तन्नाशे कारणान्तरस्य च कल्पनापेक्षया द्व्यणुक
एव कल्प्यते लाघवादित्याहुः ।

केचित्तु त्र्यणुकमहत्त्वं प्रति स्वाश्रया
णुत्वं हेतुरतो न तादृशमहत्त्वेऽवयवमहत्त्वस्य
मिति । तन्न । द्व्यणुकेऽपि तादृशमहत्त्वापत्तेः

...मारभु ...
त्वेन समवेतीयाणुत्वेनासमवेतसमवेतसमवे
वा हेतुत्वम् । न चैवं द्व्यणुकद्वयात् त्र्यणुकोत्प
इष्टत्वाद् इत्याहुः ।
चयरहितैरवयवैरारब्धस्य महत्त्वं महत्त्वबहुत्वे
न्यम् । प्रचयसहितैस्तादृशैरारब्धस्य महत्त्वं संख
प्रचयजन्यम् । संख्यारहितताद‍ृशाभ्यामवय
ब्धस्य महत्त्वं प्रचयमहत्त्वजन्यम् । तेषु महत्त
ानुभवादिति दिक् ।
गादिगतं नित्यमहत्त्वं तु परममहत्त्वत्वजाति
महत्त्वमित्याहुः ।
र्घत्वत्वजातिमद्दीर्घत्वम् । तच्च त्र्यणुकमारभ
विपर्यन्तेष्वेव । सर्वमनित्यम् । तन्महत्त्ववद
अत्र दीर्घत्वं कारणमिति विशेष इति कश्चित
तु दिगादावपि परमदीर्घत्वम् । तच्च नित्यम्
मेव दीर्घत्वमिति वाच्यम् । तदवधिकमहत्त्व
दवधिकदीर्घत्वाव्यवहारादित्याहुः ।
स्वत्वत्वजातिमद् ह्रस्वत्वम् । तदणुपरिमाणवत
नित्यमनित्यं चाणुपरिमाणवत् । द्व्यणुकमात्र

त्र प्रमाणं तु अणुद्रव्यम् अणुव्यवहारविषय
द्रव्यत्वादित्यनुमानम् । त्र्यणुकमहत्त्वे त्र्या
व द्व्यणुकाणुत्वे ह्रस्वत्वे च समवाय्यसमवायि

[illegible]
तत्सदृशेभ्योऽप्युत्व ह्रस्वत्वव्यवहारश्च तत्
दीर्घत्वाभावनिबन्धनस्त्वयापि स्वीकृत एवे

परे तु दीर्घत्वप्रतीतेरवयवसंयोगविशे
न तत्परिमाणम् । अन्यथा वर्त्तुलत्वचतुरस्र
माणान्तरतापत्तेः । न चैते महत्त्वविशेषा ए
म् । दीर्घत्वेऽपि तुल्यत्वात् । तदवधिकमह
ततो दीर्घत्वप्रतीतेर्न महत्त्वविशेषस्तदिति
वर्त्तुलत्वादावपि तुल्यत्वात् । संयोगस्य वि
र्त्तुलत्वादौ सावधित्वप्रतीत्या न दीर्घत्वमा
णत्वसाधकः सावधित्वानुभवोऽपीति दिक्

पृथक्त्वत्वजातिमत्पृथक्त्वम् । सा च
तदाश्रयश्चास्मादयं पृथगिति व्यवहारेण क
च सिद्धः । न चान्योन्याभावेनैव तयोरुपप
नेत्यप्रतीतेरन्योन्याभावस्य सावधित्वाभाव

अपरे तु अन्योन्याभावेन पृथक्त्वव्यव
नेत्यत्र पञ्चम्याः साधुत्वापत्तिः । अन्यारा
रपदसमभिव्याहारात्तथा तात्पर्यकेणान्यार्थप
मीविधानात् । यथाश्रुते तु पटात्पृथग्भिन्न इ
मी न स्यात् सूत्रे तेषामनुपादानादिति वद
सूत्रेण पदविशेषयोगे पञ्चमीविधानात् । का
द्यवदन्येत्यत्रान्योन्याभाववाचकान्यपदयो
स्यात् ।

...(विज्ञेयम् । ...)

ं नित्यमनित्यगतमनित्यम् । द्वितीयमनित्यं

त्वे स्वाश्रयावयवगतमेकपृथक्त्वमसमवायि

तीये समानाधिकरणैकपृथक्त्वानि असमवा

ने । तद्बुद्धिर्निमित्तकारणम् । तन्नाशान्नश्यति

घटात्पृथगिति प्रतीतेः घटावधिकैकपृथक्त्व

भिन्नावितिवत्प्रत्ययोपपत्तेर्न द्व्याद्याश्रितं प्रम

वाच्यम् । घटावधिकेनैव व्यासज्यवृत्तिना

ग्रटः घटात्पृथगिति व्यवहारोपपत्तेरेकाश्रिते

भावप्रसङ्गात् । तस्मादाश्रयभेदादवधिभेदाच्च

ा विनिगमकाभावादिति प्राञ्चः ।

रे तु घटावधिकं पृथक्त्वं नैकं सर्वद्रव्ये समवा

दाऽभावात् । अतस्तत्तद्द्रव्ये उत्पन्ने तत्सन्निकृष्टे

ादितरस्यावधित्वं कल्प्यत इति न व्यासज्यवृ

मानम् । न चैकदोत्पन्नानन्तद्रव्येष्वेकमेव पृ

यात्तेनैव प्रत्येकं तदितरावधिकपृथक्त्वव्यव

ारिति व्यासज्यवृत्त्यपि दुर्वारमिति वाच्यम् ।

वधिकपृथक्त्वप्रतीत्या प्रत्येकपृथक्त्वस्वीकार

त्र व्यासज्यवृत्तेः स्वीकारो गौरवादित्याहुः

व्यास्तु घटात्पृथगिति प्रतीतौ प्रतियोगित्व

स्याश्चान्योन्याभावेनैवोपपत्तेर्नातिरिक्तं पृथक्

ा । अन्योन्याभावस्यैव सावधित्वं कल्प्य

पनातो धर्मकल्पनाया लघीयस्त्वादित्याहुः ।

...
विच्छेदकजातिमान् कर्मजः, संयोगजन्यतावच्छेदकजातिमान् संयोगजः। न च संयोगकर्मजन्यतावच्छेदकसंयोगजातिद्वयकल्पनापेक्षया संयोगजनकतावच्छेदकतया कर्मसंयोगसाधारणी जातिरेव कल्प्यताम्। गुणत्वेन संकरप्रसङ्गादिति प्राञ्चः॥

अन्ये तु गुणत्वजातेरनभ्युपगमेऽपि तुल्य...विभागजनकतावच्छेदकतया कर्मविभागसाधारणी तया संयोगजनकतावच्छेदकजातेः कर्मणि ...करण्येन संकरान्न संयोगस्य विभागस्य च जनकतया एकजातिसिद्धिः। न च संयोगस्यापि ...कत्वाद्विभागजनकतावच्छेदकजातेः संयोगसंकर इति वाच्यम्। विभागं प्रति संयोगस्य ...तुल्यस्यावश्यकत्वात्। अन्यथाऽसंयुक्तेऽपि कर्म...प्रसङ्गात्। एतत्परिहारार्थमेव संयोगस्य वि...ताङ्गीकारात्। न चासंयुक्ते विभागवारणार्थं ...स्य विशिष्य विभागजनकता तथापि विभाग...च्छेदकजातेः संकरवारणार्थमेव संयोगादित्रितय...कल्प्यतामिति वाच्यम्। संयोगजनकतावच्छेद...विभागादित्रयसाधारण्येन तत्परिहारसंभवात्।

वस्तुतः संयोगस्य स्वसमवायिनि स्वसमवायिनि संयोगजनकत्वात्कर्मणः स्वसमवायि...वायिनि संयोग...

...वस्तु यथा ...विषयिणत्वात् । अन्यतरव
ान्यतावच्छेदकतया सिद्धौ जातिविशेषावेव त
ाति प्राहुः ।

न्ये तु विजातीयसंयोगं प्रति कर्मत्वेनैव कार
[न त्वन्यतरकर्मोभयकर्मजन्यतावच्छेदकजाति
ारवादित्याहुः ।

योगजस्तु अवयवानवयवसंयोगादवयव्यनवय
। यथा हस्ततरुसंयोगाच्छरीरतरुसंयोगः । न
ाजन्यः संभवति । तस्याः समवायेनैव संयोग
[कारणैकार्थसमवायेन समवायेन च कर्म
ापेक्षया समवायेन संयोगस्यैव हेतुत्वौचित्या
त्र कपालक्रियया कपालान्तरेण भूतलेन च संये
ाणे क्रियानाशघटोत्पादौ । ततः कपालभूतलसं
टभूतलसंयोगः । तदानीं कपालक्रियानाशात्

नु यत्रावयवक्रियोत्तरक्षणे ऽवयविनि क्रि
योत्तरसंयोगकाले एवावयविनि पूर्वदेशसंये
ुत्तरकाले ऽवयविन्युत्तरदेशसंयोगस्तस्य संये
तरजन्यत्वे विनिगमनाविरहः । उभयजन्य
' इति चेत् । अत्र प्राचीनाः । संयोगद्वयमेव त
ये विच्याग्रहस्त्वत्यन्तसादृश्यादिति ।

परे त विचित्र एव तत्र संयोग उत्पद्यते न ब

अवयवसंयोगेनेति वदन्ति ।

केचित्तु अवयवकर्मोत्पत्तिकालेऽवयविनि क
कुर्वतितयावयवावयविनोर्युगपदेवोत्तरदेश
यमानत्वेन कर्मजन्य एव संयोगः । न च य
त्तिकाले ऽवयवकर्मोत्पत्तिरत्रेदमिति वा
यक्षणे अवयविनि कर्मानुत्पत्तेः । तद्धेतोरभ
ः । तथा । यत्रावयविन उत्पत्तिद्वितीयक्षणे
तत्र पूर्वक्षणेऽवयविनोदनाद्यभावान्न कर्मोत्पत्ति
दुत्तरक्षणे तत्रावयविसंयोगस्य कर्मजन्यत्वं
त्वं वेति विचारसंभवात् । न चावयविनि स्वे
यक्षणे क्रियाऽसम्भवेऽपि तृतीयक्षणे क्रिया
यवविभागाद्विभागस्य सम्भवेन चावयवार
गकालेऽवयविनि पूर्वदेशसंयोगनाशसम्भवेन
वयविसंयोगस्य संयोगजत्वं कर्मजत्वमिति
वत्येवेति वाच्यम् । अवयविन उत्पत्तिक्षणे
ागजनककर्मणो नाशस्य जायमानत्वेन पूर्व
त्वेनावयविन उत्पत्तिक्षणे ऽवयवे कर्मासम्भ
न चावयविजनकसंयोगस्यान्यतरकर्मजन्य
दवयविनोत्पत्तिक्षणनिष्क्रिये कर्मोत्पत्तिः सम्भ
म् । तन्मात्रस्वीकारे तच्चतुर्थक्षणे घटकनाश
ासम्भवात् ।

न च निष्क्रिये कर्मोत्पत्तिरिति वाच्यम्
शसंयोगकाले घटनाशात् । न चावयविज

ना-न्यत्वस्याकारात् । अन्यथा संयोगजन्य
जात्येन सङ्करापत्तेः । न च संयोगजन्यतावच्
व्याप्यत्वमेव तस्येति वाच्यम् । व्यणुकजन
ाभावापत्त्या व्यणुकोत्पत्त्यभावापत्तेः ।
वेन उत्पत्तिद्वितीयक्षणे अवयवे कर्म तत्र पूर्व
ष्नि कारणाभावेन कर्मानुत्पत्तिः किं तु तदुत्तर
वयविविभागस्य उभयजन्यत्वं अन्यतरजन
म्भवतीति वाच्यम् । तत्र समाधेरुक्तप्रायत्व
भागत्वजातिमान् विभागः । सा चानुगत
। स च घटादिषु प्रत्यक्षादतीन्द्रियेष्वनुमा
। न च तदीयसंयोगाभावेन तत्र तद्विभक्त
तरिति वाच्यम् । उत्पत्तिकालेऽपि द्रव्ययोर्
पापत्तेः । अत एव न तत्संयोगप्रागभावेन । न
वंसेन विभज्य संयुक्तेऽपि विभक्तप्रत्ययापत्
वोऽप्यनित्यः । सर्वद्रव्याश्रितश्च । स द्विधा । का
जश्च । आद्यो द्विविधः । अन्यतरकर्मज उभय
तादृशसंयोगोदाहरणवदत्रोदाहरणं प्रष्टव्य
विनः उत्पत्तिद्वितीयक्षणेऽवयवकर्म तत्र पू
वेनादनाद्यभावान्न कर्मोत्पत्तिः किं तु तदुत्तर
विकर्मोत्पत्त्युत्तरक्षणेऽवयविविभागस्योभ
न्यतरजन्यत्वं वेत्येवं पूर्वपक्षः । समाधानं च
यमिति दिक् ।
रे तु विभागजोऽपि द्विविधः । एकः कारणा

नु पूर्वसंयोगनाशप्रत्यक्षस्य विभागप्रत्यक्षे हेतुत्वा
रेकसिद्धम् । पूर्वसंयोगप्रत्यक्षाभावकाले वि
मानसं पूर्वसंयोगेनानुमित्यात्मकं वेत्युत्तरदे
ले पूर्वसंयोगप्रत्यक्षाभावात्तदुत्तरक्षणे विभ
सम्भवेनोत्तरदेशसंयोगक्षणे विभागसत्त्वे न
वेत् । न । अस्तु तथा हेतुत्वं न तु कार्यसहभ
त् । तथा च पूर्वसंयोगनाशोत्पत्तिक्षणोत्पन्नपू
पश्चादेवोत्तरदेशसंयोगोत्पत्तिकालोत्तरक्षणे वि
सम्भवात् । न च विषयस्य कार्यसहभावेन हे
ावात् । तथा हेतुत्वेऽपि न क्षतिः । विभागोत्प
रसंयोगप्रत्यक्षादपि तत्प्रत्यक्षसम्भवात् ।
कार्यसहभावेन विभागप्रत्यक्षे हेतुता गौरव
था भवदभिमता तथा हेतुता तथापि लाघव
ात्तरदेशसंयोगत्वेनैव विभागनाशकत्वं न तु पु
शत्वेन गौरवादित्युपपादितं पाकजप्रक्रियावर
ंचित्तु हस्तसंयोगः समवायेन हस्तविभागना
तविभागोत्तरं न हस्तसंयोगः स विभाग आ
स्यः हस्तसंयोगज्ञानस्य हस्तविभागप्रत्यक्षे हेतु
ज्ञाने तत्प्रत्यक्षम् । न च विभागस्य क्षणिक
तसंयोगस्य पूर्वं सत्त्वादिति वाच्यम् । कार्यस
य संयोगस्य विभागनाशे हेतुत्वात् । न च वि
ोर्यमानहस्तसंयोगस्य क्षणिकत्वापत्तिः समव
ागत्वेनैव हस्तसंयोगनाशकत्वादिति वाच्य
कार्यसहभावेन संयोगनाशक...

पर तु तदाश्रययोगत्वाविच्छन्नाभावविशिष्ट
येन तदीयसंयोगप्रतियोगिकध्वंसेन तद्विभाग
प्रत्तेनातिरिक्तविभागे मानम् । घटपटान्यतर
टपटसंयोगनाशेन घटपटयोर्विभक्तप्रत्ययाभा
शाजन्यत्वं संयोगनाशे विशेषणम् । विभ
युक्ते विभक्तव्यवहारवारणाय तदीयसंयोगत्वा
भावविशिष्टेति । तावन्मात्रं चेद् गुणादौ द्र
त्ययापत्तिरित्यग्रिमम् । यत्र द्रव्ययोर्विद्यमानत्व
न तु विनाशे आश्रयनाशाजन्यत्वम् ।
मानघटे विभज्य पटसंयुक्ते आश्रयनाशाज
योगध्वंससत्त्वेऽपि पटनाशोत्तरं न पटाद्वि
वहारः । नापि घटे घटविभक्तव्यवहारः । न
भाव एव संयोगोऽस्त्विति वाच्यम् । अनन्त
ादिकार्येषु द्रव्यचक्षुर्विभागाभावापेक्षया द्र
ागादेरेव लाघवेन हेतुत्वात् । न च विभ
ाघवेन विभागस्य हेतुत्वात् विभागसिद्धि
। विलक्षणविभागस्यैव शब्दजनकतया तत्प्रयो
विशेषस्यैव शब्दहेतुत्वाङ्गीकारादित्याहुः ।

त्वत्वजातिमत्परत्वम् । तत्सिद्धिश्च पर इ
। तद्द्विविधम् । दिक्कृतं कालकृतं च । द्वयम
अपेक्षाबुद्धिनाशनाश्यं सावधिकं च । आद्य
ापेक्षाबुद्ध्या यदवधिकपरत्वोत्पत्तिर्यत्र तत्राव

तं कालपिण्डसंयोगोऽसमवायि । अपरत्वे तद्
परत्वबुद्धिर्निमित्तमेतावान् भेदः । तच्च द्रव्
ऽवेव द्वित्वादिवत्परत्वादेरपेक्षाबुद्धिजन्यत्वमक
ं द्रष्टव्यम् । एतत्सत्त्वं निरूपितं प्रागिति दिक्

गुरुत्वत्वजातिमद् गुरुत्वम् । तच्चातीन्द्रियम
क्षम् । नित्यगतं नित्यमनित्यगतमनित्यमाश्र
यं च । स्वाश्रयावयवगतं गुरुत्वमसमवा
। तच्च पृथिवीजलवृत्ति । संयोगासमवायिन
ा गुणासमवायिकारणिका क्रियात्वात् संयो
गवदित्यनुमानात् तत्सिद्धिरिति प्राञ्चः ।

अन्ये तु गुरुत्वस्य यावद्द्रव्यभावित्वेन
ावारणाय कारणान्तरस्याभावेन प्रतिबन्धकस
वा सर्वदा क्रियानुत्पादो बाध्यः । तथा च ग
म् । उक्तानुमानस्य च पक्षविशेषणासिद्धिरि
तत्त्वं गुणरहस्यटिप्पण्यां वेदितव्यमिति दिक् ।

द्रवत्वत्वजातिमद् द्रवत्वम् । तच्च द्रवत्वं द्र
गतप्रत्यक्षादतीन्द्रियेष्वनुमानात्सिद्धम् । तच्च
देत्रयवृत्ति । नैमित्तिकं स्वाभाविकं च । तत्र
ेजःसंयोगजन्यतावच्छेदकजातिमन्नैमित्तिकम्
वृत्ति । तच्चानित्यम् । तत्र तेजःसंयोगोऽसम
श्रयनाशनाश्यम् । अग्निसंयोगनाशनाश्यं च

ननु स्वाभाविकद्रवत्वनिष्ठकार्यतावच्छे

वच्छेदकत्वमेवास्तु लाघवात्[1], न तु द्रवत्व

दकत्वं गौरवात् । न च जलपरमाणौ द्रवत्वा

रणा द्रवत्वस्य कारणत्वे तु परमाणौ तेन

ाभावादेव न तदुत्पत्तिरिति वाच्यम् । द्रव

स्य प्रतिबन्धकत्वादेव तत्र द्रवत्वानुत्पत्तेरि

अत्र प्राञ्चः, भावकार्यस्यासमवायिकारणजन

तद् द्रवत्वस्य द्रवत्वकारणत्वावश्यकत्वे ज

विशिष्य कारणत्वे गौरवमिति वदन्ति ।

नव्यास्तु उक्तनियमानङ्गीकारेण जलत्वेनै

त्वम् । यद्वा जलमात्रवृत्तिजात्यङ्गीकारेण त

रणतावच्छेदकत्वं कल्प्यते । तथा च स्वा

वं सर्वं जन्यं जन्यजलमात्रवृत्ति । परमाणुष

नङ्गीकारेण लाघवम् ।

अथ वा द्रवत्वविशेषजनकतावच्छेदिका

णुकादिमात्रवृत्तिस्तज्जनकतावच्छेदकं द्व्यणुक

तेजलत्वं, तज्जनकतावच्छेदकं सकलजलवृ

। सामञ्जस्ये ऽनन्तद्व्यणुकादिषु द्रवत्वस्वीका

। त्वन्मते तु पृथिव्यां स्वाभाविकद्रवत्व

क्षणद्रवत्वं प्रति विलक्षणद्रवत्वस्य हेतुता

च कारणतावच्छेदकतया कार्यतावच्छे

जातिद्वयकल्पने गौरवम् । न च सर्व

द्रवत्वत्वेनैव स्वाभाविकद्रवत्वकारणतावच

द्रवत्वस्य भावत्वकल्पनारूप ...

द्रवत्वानुत्पादसम्भवादिति वाच्यम् । तथापि
ानन्तद्रवत्वादिकल्पने गौरवापत्तेः । यत्र प
नैमित्तिकद्रवत्वोत्पत्त्यनन्तरमवयविन उत्प
भाविकद्रवत्वापत्तेश्च । अवयवद्रवत्वस्य सत्त्व
के चित्तु अग्निसंयोगप्रयोज्यं नैमित्तिकं पृथि
, अग्निसंयोगाप्रयोज्यं स्वाभाविकं तच्चात्र
भाविकत्वं जातिविशेषः प्रमाणाभावात् । तथ
जातित्रयम् । तेजःसंयोगजन्यतावच्छेदिका एव
ासाधारणी द्रवत्वविशेषजनकतावच्छेदिकाऽ
वेशेषजन्यतावच्छेदिकाऽन्या । अत एव द्रवत्व
ाः संयोगेन घृतान्तरोत्पत्तौ अवयवद्रवत्वा
त्पत्तिः । विलक्षणस्वाभाविकद्रवत्वस्वीकारे
संयोगकल्पनेन, द्रवत्वजन्यतावच्छेदकजातेः
कद्रवत्वजन्यतावच्छेदकजातिव्यापकत्वस्वीक
त्येत्पत्तिरिति वदन्ति । तन्न । स्वाभाविक
ावच्छेदकजात्या सङ्करप्रसङ्गात् ।

कश्चित्तु, संग्रहः सक्तुकादीनां संयोगविशे
त्वं स्नेहसहितं निमित्तं, स्पन्दनाख्यक्रियाविशे
मवायिकारणम् । स्नेहसहितेत्युपादानात् ...
त्वेन संग्रहासम्भवेऽपि न दोष इत्याह । तद
वनैवानतिप्रसङ्गेऽपि द्रवत्वप्रवेशे प्रयोजकत्वाद
पत्तेरिति दिक् ।

... [illegible] ...

तुला जलेनैव सक्तुकादिदर्शनरसयोः॥ जायते
ति दिशसंयोगविशेषे जलसंयोगविशेषस्य सं
ग जलस्यैव वा हेतुत्वात् प्रत्यक्षस्यापामरसाध
त्वाच्च स्नेहसिद्धिरिति दिक्।
ं प्रकृष्टस्नेहो दहनानुकूलः। स च तैलादौ वि
मानिष्ठः। अप्रकृष्टश्च प्रसिद्धजलगतो दहन
निरसनम्। कर्पूरादिद्रव्यस्य कर्पूरत्वादिनैव र
त्वाज्जलत्वेनैव दहनविरोधित्वाच्चेति दिक्।
स्कारत्वजातिमान् संस्कारः। मूर्त्तामूर्त्तवृत्ति
सगुणत्वसाक्षाद्व्याप्यजातिमान्वा। शब्दज
कसंयोगविशेषगतजातिवारणाय गुणत्वसा
। स त्रिविधः। वेगो भावना स्थितिस्थापकश्चे
त्र वेगत्वजातिमान् वेगः। स च मूर्त्तवृ
र्मजनकश्च। क्वचिदवयववेगजन्यश्च। स च
गात् क्वचिदाश्रयनाशाद्विलक्षणकर्मणा, च नश्य
क्रियातिरिक्तवेगे किं मानमिति चेत्?
त्र केचिद्वेगेन चलतीति प्रत्ययात्तत्सिद्धिमाहु
न्ये तु युगपत् प्रक्षिप्तनाराचयोः शीघ्रगामि
मेत्वं वेगकृतम्। तथा हि किञ्चित् कर्म सन्नि
गजनकं किञ्चिच्च दूरदेशसंयोगजनकमिति कर्म
कारणवैलक्षण्याधीनम्। अतो दूरदेशसंयोगज
णं कर्म विलक्षणवेगजन्यं यस्येषोः स शीघ्रं ग
त न सन्निकृष्टदेशजनकं तद्विलक्षणं कर्म विलक्ष

नकवेगनाशः स्वाश्रयविभागश्च, ततः
गौ,तत उत्तरदेशसंयोगः, ततः कर्मनिवृत्ति
वेगात्कर्म । कर्मणः समवायेन कर्मोत्पत्ति
न वेगाद्वितीयक्षणे कर्म । एवं वेगं प्रति
विन्धकत्वान्न वेगाद्वितीयक्षणे वेगः । एवं च
क्रियाबाहुल्यं स दूरदेशगामी । यत्र
ास्वल्पता स निकटदेशगामीति । न च
ं कुतो नेति वाच्यम् । विलक्षणकर्मण
त्तस्य च तत्राभावाद्वेगानुत्पत्तेः, साधर्म्यं

यत्तु कर्मणा वेगः, तेन पूर्वकर्मनाशः
: पूर्वदेशसंयोगनाशश्च,तेन कर्मणा वेगःपूर्व
रदेशसंयोगोत्तरमेव पूर्वोत्पन्नकर्मणा वि
ूनतया कर्मोत्पत्तिः सप्तमे क्षणे उत्तरदेश
देशसंयोगसम्भवाच्छीघ्रगामित्वम् । य
[पूर्वकर्मनाशः " तत्क्षणे क्रियाजनकसंयो
त्तरक्षणे कर्म; तेन स्वोत्तरक्षणे विभागः ,
त्युत्तरमेव नवमे क्षणे उत्तरदेशसंयोगात्
क्षणाद्यविलम्बान्मन्दगामित्वम् । कर्म
कत्वान्न सर्वकर्मणा वेगोत्पत्तिः । कर्म
स्य हेतुत्वान्नोत्तरसंयोगजन्यकर्मनाशे
। तत्र ।समवायेन कर्मोत्पत्तौ समवायेन
वेन वेगोत्पत्तिद्वितीयक्षणे कर्मानुत्पत्तेः

कर्मक्षयोत्पादप्रसङ्गात् । क्षुपस्तौ ग
म्। किंच कर्मोत्पत्तिद्वितीयक्षणे विभागो वे
गसंयोगनाशक्षणे कर्मनाशास्तेन कर्मणा चो
ाजननात्किमर्थं प्रथमकर्मस्वीकारः ? अथ वेग
यक्षणे पूर्वकर्मणा पूर्वसंयोगनाशजननास्तत्
णा पूर्वसंयोगनाशोत्तरक्षणे उत्तरदेशसंयोगा
नः कर्मविभागः पूर्वकर्मनाशश्च ।

ननु पूर्वकर्मणा तदानीं विभागः विभागं प्र
त्तित्वेन कर्मणो हेतुत्वात् । अन्यथोत्तरदेश
विनश्यद्वस्थकर्मणा विभागोत्पत्त्यापत्तेः" ।
पूर्वदेशविभागश्च, एवं क्रमेण यत्र वेगक्रिया
दूरदेशगामित्वं यत्र क्रियावेगयोः स्वल्प
क्षुद्रदेशगामित्वमिति चेत् ? न । क्रियायां वे
च्छेदकस्योत्तरदेशसंयोगनाश्यतावच्छेदकस्य
कल्पने क्रियावेगयोः प्रतिक्षणमुत्पादविना
त्वापत्तेः । उत्तरदेशसंयोगानन्तरं विनश्यद
विभागोत्पत्तिवारणाय विभागं प्रति कर्मणः
त्वेन हेतुत्वेन विनश्यद्वस्थकर्मणाविभागास
त्कप्रतिबध्यप्रतिबन्धकभावस्वीकारेऽपि क्रि
भागौ, ततःक्रियानाशसंयोगनाशौ, ततो वेगा
वेगनाशोत्तरदेशसंयोगौ, ततः क्रियातो वेगा
कर्मनाशपूर्वसंयोगनाशौ, ततःकर्म, ततउत्तरदेश

परास्तम् ।

नव्यास्तु संस्कारत्वजातौ न मानम् । अ
घटितोत्कलक्षणमपि निरस्तम् । किं च मू
र्तवृत्तिकालवृत्तिजातिमात्रस्यैव स्पन्दत्वेन शेष
जनकतावच्छेदकजातेः शब्दनिमित्तकारणसं
रेण तस्या अमूर्तवृत्तिवृत्तित्वाभावात् ।

यच्चोक्तं दूरदेशवृत्तिसंयोगजनकविल
कतया वेगसिद्धिः । तदपि न । विलक्षणवेगजन
चिरकालस्थायितया दूरदेशसंयोगजनकत्वसंभव
एवं विलम्बगामित्वस्यापि विलक्षणकर्मणैव
योगेन ? यत्र विलम्बगामिनि द्रव्यान्तरक्रिया
उत्तरदेशसंयोगप्रतिबन्धका विभागादेरुत्पत्ति
कल्पनात्, अत एव तस्य विलम्बगामित्वमिति
अत एव युगपत्प्रक्षिप्तनाराचयोः कस्य चित् र
मित्वेन कस्य चिद्विप्रकृष्टदेशगामित्वेन वेगसि
त्ता । तत्तत्क्रियाया एव फलबलेन तत्तद्देशसंयो
कल्पनात्किमनन्तवेगादिक्रियादिसन्तानकल्पने

अपरे तु यत्रोत्तरदेशसंयोगोऽप्युत्तरक्ष
णोत्तरजनकसंयोगकल्पना तत्र शीघ्रगामित्व
देशसंयोग एव वा क्रियाजनकतावच्छेदकधर्म
ता तत्र शीघ्रगामित्वं तदुत्तरोत्तरक्षणे । यत्र
रिकसंयोगकल्पना तत्र न मन्दगामित्वम् । एवं
तृतीयक्षणे क्रियान्तरजनकसंयोगकल्पना ता

कः । एवं भावना ज्ञानजन्यज्ञानसजाति
निका, स्थितिस्थापकोऽपि क्रियाजन्यः सञ्च
रजनकश्चेति निरस्तम् । शब्दस्यापि शब्दज
ात् सजातीयशब्दजनकत्वात् तत्रापि तादृश
त्त्वेन संस्कारत्वसत्त्वापत्तिरिति वदन्ति
न्द्रियत्वात्मविशेषगुणः । आत्मवृत्तिरनु
भूतिजन्यश्च । स्मृतिजनकतावच्छेदकजातिम
व, तस्य च क्वचित् समानप्रकारिका स्मृतिः
धिज्ञानं, क्वचिन्मदः, क्वचित्तीव्रदुःखं, क्वचि
शकः । तस्यात्ममनःसंयोगोऽसमवायी ।
ादरप्रत्ययाभ्यां दृढतर उत्पद्यते सादृश्यदर्श
न्तायन्यतमसहकृतः स्मृतिहेतुः । न चातीन्द्रिय
नाभावः स्मृतिस्त्वनुभवध्वंसकार्यापरकानुभ
ाते इति वाच्यम् । अनुभवस्य कारणीभूताभ
ोगित्वेन स्मृतिप्रतिबन्धकत्वापत्तिरिति प्राञ्चः ।

परे तु कारणीभूताभावप्रतियोगित्वं न प्रतिब
दण्डाभावस्य कारणीभूताभावात्मकदण्डप्र
र घटप्रतिबन्धकत्वापत्तेः, किं तु यदभाव
णत्वं तत्र तस्य प्रतिबन्धकत्वम् । दण्डाभाव
न घटकारणता गौरवाद्दण्डध्वंसादपि घट
ं तु दण्डत्वेन । एवं च स्मृतौ नानुभवाभावत्
अत्यन्ताभावेनापि स्मरणापत्तेः । किं तु ध्वंस

त्तज्ञानत्वेनैव देवदत्तगोचरणे कारणताकल्प
पश्चाच्च यज्ञदत्तज्ञानेऽपि सति न देवदत्त
देवदत्तस्मरणादिना तस्य संस्कारस्य ना
मन्मते च दशयज्ञदत्तज्ञानानां दशसु
तद्व्यक्तित्वेन हेतुत्वे दशकार्यकारणभा
मिति वाच्यम् । एतावता स्थलविशेषे सं
सर्वत्र तस्यासिद्धेः। किं च संस्कारस्य तदूर्ध्वं
वस्य संस्कारनाशे च स्मृत्यादेः कारणत्वस्य
संस्कारस्य प्रतिबन्धकतायां अनन्तसंस्
नापेक्षया यज्ञदत्तज्ञानेऽवेव देवदत्तगोचरणज
धर्मस्यैव कल्पनाया उचितत्वम् । न च तत्
त्वे तदवच्छिन्नं प्रति अनुगतं कारणं वाच्यमि
वाच्यम् । घटनिर्विकल्पकोत्तरं घटत्वविशि
ज्ञानानङ्गीकारपक्षे तत्तद्विशेषणज्ञानत्वेनै
बुद्धौ जनकत्वेन तत्तज्ज्ञानजन्यासु यज्ञदत्त
त्वीकारेण तादृशविषयताशालि वावच्छि
ना हेतुत्वेऽप्यक्षतेः। तत्तद्यज्ञदत्तज्ञानात्
ताशालिज्ञानस्याभावाच्च तदनन्तरं तदापा
नात्मकं तु तज्ज्ञानकारणज्ञानाभावादेव
अस्तु वा स धर्मः शक्तिवन्नित्य एव, स्वी
रणत्वेन रूपसामान्याभाववत् कारण
तत्तज्ज्ञानभिन्नत्वावच्छिन्नभेदः, मास्तु वा
[illegible]

तो ऽनित्यः कारणगुणपूर्वकश्चेति कश्चित् ।
रे तु स क्रियाविशेषजन्यःकारणगुणजन्यः क्रि
हेतुश्च । न च वेगादेव धनुःशाखादौ क्रियास
ं तेनेति वाच्यम् । वेगस्य स्वदेशोत्तरदेशसंयो
क्रियाजनकत्वं बलादुन्नमितधनुःशाखादिक्रिया
स्य यथापूर्वसंयोगजनिका विलक्षणा विलक्षणं
पयति तदेव तादृशजातिमदिति प्राञ्चः ।
ापरे तु कारणगुणपूर्वकस्य स्थितिस्थापकस्य द्र
तीयक्षण एवोत्पादात् सर्वदा तादृशक्रियाप
नम् । न च क्रियात्वव्याप्यजात्यवच्छिन्नं प्रति
भात् सर्वदा क्रियासामान्यकारणाभावान्न तदु
च्यम् । वेगादिना धनुषि क्रियोत्पादकालेऽपि त
त्पादप्रसङ्गात् । कथं तर्हि विलक्षणा क्रिया न
क्रियासामान्यकारणवशाज्जायमाना क्रिया भि
ार्विशिष्यैव कार्यकारणभावस्याङ्गीकारात्त
जनयतीति वदन्ति ।
ोत्रग्राह्यगुणत्वव्याप्यजातिमान् शब्दत्वजाति
ब्दः । स प्रत्यक्षसिद्धः ।
े चित्तु आकाशविशेषगुणत्वं ज्ञानासमानाधि
विशेषगुणत्वं वा तल्लक्षणमाहुः ।
द्विविधः । वर्णात्मकोऽवर्णात्मकश्च । तत्रा
देना आकाशसंयोगोऽसमवायी । ताल्वादिना

रणादुत्पद्यन्ते । द्वितीयादयस्तु पूर्वपूर्व
वायिकारणादिकाः । सर्वोऽपि शब्दोऽपि
न्त्यादन्यः कार्यशब्दनाश्यः । अन्त्यस्तु उपान्
नाशाद्वा नश्यति । अन्त्यः सर्वोऽपि द्वो
भागजानामाद्यानां तु वंशादिदलद्वयविभागो
[। दलाद्याकाशविभागोऽसमवायिकारणम् ।
र दलाकाशसंयोगो वाद्याकाशसंयोगो वा
कारणमस्तु, किं विभागेनेति वाच्यम् । तयोः
र शब्दानुत्पत्तेर्विभागस्यैवासमवायित्वात् । कि
पूर्वशब्दाद्यसमवायिकारणादिकाः

कर्णशष्कुलीविवरावच्छिन्नं नभः श्रोत्रं श
तो न देशान्तरवृत्तिशब्दग्रहः । यत्र यः शब्दो
ावच्छिन्नः स तेन गृह्यते । अत एव भेर्यादिशब्दा
नां कर्णावच्छिन्नत्वाभावेन ग्रहणासंभवाद्वी
चीन कदम्बगोलकन्यायेन वा शब्दोत्पत्तिस्वी
वच्छेदेनोत्पन्नो गृह्यते भेरीशब्दो गृह्यत इति धी
ं तु भेर्यादिप्रयोज्य एव गृह्यत इति प्राञ्चः ।

परे तु भावकार्यत्वस्यासमवायिकारणजन्यत
ा मानाभावेन भेर्यादिदण्डादिसंयोगान्निमित्
कृतादाकाशादेव शब्दस्योत्पत्तौ भेर्याद्याकार
त्वे मानाभावः । न च भेर्याद्याकाशसंयो
मस्तु; किं भेरीदण्डसंयोगेनेति वाच्यम् ।
व्यतिरेकाभ्यां [illegible]

दभेदे सिद्धे बहुकालस्थायित्वसिद्धौ शब्दस्य
वसिद्धौ अन्यस्य नाशकस्याकल्पनान्नित्यत्व
म् । तदेवेदमौषधं सेयं दीपकलिकेतिवत्
प्रास्तिज्जात्यवच्छिन्नभेदाभावविषयत्वात् ।
